**व्याकरणस्य आनुषङ्गिकानि प्रयोजनानि उल्लिख्य यथेच्छं त्रितयविषये आलोच्यम् ।**

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति वचनात् भाष्यपठनात् पूर्वं भाष्यस्यापि प्रयोजनं निगदनीयम् । अतः भाष्यप्रयोजनकथनकाले द्विविधं प्रयोजनं भाष्यकारेण उल्लिखितम् । तयोः मुख्यं प्रयोजनं तथा गौणं प्रयोजनम् आनुषङ्गिकं प्रयोजनं वा । प्रसङ्गे आनुषङ्किकानि प्रयोजनानि एव आलोचनीनि । कानि च आनुषङ्गिकानि प्रयोजनानि – तेऽसुराः, दुष्टः शब्दः, यदधीतम्, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तिं कुर्वन्ति, यो वा इमाम्, चत्वारि शृङ्गाः, उत त्वः, सक्तुमिव, सारस्वतीम्, दशम्यां पुत्रस्य, सुदेवो असि वरुण इति ।

तेऽसुराः --- शास्त्रे साधुशब्दः तथा शब्दश्चेति समानार्थकौ । परन्तु तद्भिन्नः शब्द एव अपभ्रंशशब्दः इति कथ्यते । शास्त्रे साधुशब्देन लौकिकानां वैदिकानाम् उभयेषामेव शब्दानां ग्रहणं कृतम् । साधुशब्दानां प्रयोगेण धर्मः उत्पद्यते परन्तु असाधुशब्दानां प्रयोगेण अनर्थः भवति इति कथनप्रसङ्गे एव भाष्यपस्पशाह्निके उच्यते-

**तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै । म्लेच्छो ह वा एष यदपशब्दः । म्लेच्छो मा भूमेत्यध्येयं व्याकरणम् । इति ।**

हेलय हेलय इति तु अपशब्दः । असुराः हे अरय इति न उक्त्वा अपशब्दान् प्रयुक्तवन्तः । तस्मादेव कारणात् ते देवताभिः पराजिताः । अत्र तु असुरैः वाक्यप्रयोगे प्रमाणत्रयं कृतम् । तथाहि 1. प्लुतप्रगृह्या अचि नित्यम् इत्यनेन प्रकृतिभावे कर्तव्ये तदकरणं दोषः । पदस्य द्विर्वचने कर्तव्यं वाक्यद्विर्वचनकारणमत्र प्रमादः । 3. रकारस्थाने लकारोच्चारणममपि दोषः । अत एतद्-दोषरहितप्रयोगार्थमवश्यमेव पठनीयं व्याकरणम् । वयं यथा असाधुशब्दप्रयोगेण म्लेच्छा न भवेम इत्यतः व्याकरणमवश्यमेव अध्ययेम् ।

द्वितीयः – **दुष्टः शब्दः स्वरतो वर्णतो वा**

**मिथ्याप्रयुक्तो न तमर्थमाह ।**

**स वाग्वज्रो यजमानं हिनस्ति**

**यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**

पुरा त्वष्टृनामकस्य ऋषेः विश्वरूपः असन्तुष्टेन इन्द्रेण निहतः । ऋषिणा पुत्रहन्तुरिन्द्रस्य बधार्थं यज्ञमारब्धम् । ऋषिणा आहुतिप्रदानसमये स्वाहेन्द्रशत्रुर्वर्धस्व इति आहुतिवाक्यम् अनवधानतया अन्तोदात्तत्वरूपेण अनुक्त्वा आद्युदात्तत्वरूपेण उच्चारितम् । इन्द्रशत्रुरिति पदं षष्ठीसमासनिष्पन्नं तथा बहुव्रीहिसमासनिष्पन्नं भवितुमर्हति । शत्रुशब्दोऽत्र घातकवाची । इन्द्रस्य शत्रुरिति षष्ठीसमासे कृते इन्द्रशत्रुशब्दस्य समासस्य इति सूत्रेण अन्तोदात्तत्वं सिध्यति । इन्द्रः शत्रुर्यस्य स इति विग्रहे विहिते बहुव्रीहिसमासे बहुव्रीहौ प्रकृत्या पूर्वपदम् इति सूत्रेण पूर्वपदस्य प्रकृतिस्वरत्वं च सिध्यति । किञ्च इन्द्रशब्दस्य रण्-प्रत्ययान्तत्वेन ञ्नित्यादिर्नित्यम् इत्यनेन आद्युदात्तत्वं बोध्यम् । अत्र त्वष्टुः ऋषेः प्रयोगो दुष्टरूपेण परिगणितः । त्वष्टा ईप्सितार्थफलं न प्राप्नोति । अपि तु तेन विपरीतफलं लब्धम् । आद्युदात्तत्वेन उच्चारणात् इन्द्रः शत्रुः घातकः यस्य वृद्धिं प्राप्नोतु इत्यर्थः समायातः । अतः त्वष्टुः पुत्र इन्द्रस्य घातको न भूत्वा स्वयमेवेन्द्रेण निहतः । तदुक्तं यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं ……..हिंसितवान् इत्यर्थः ।

तृतीयतः- **चत्वारि शृङ्गास्त्रयोऽस्य पादा**

**द्वे शीर्षे सप्त हस्तासो अस्य ।**

**त्रिधा बद्धो वृषभो रोरवीति**

**महो देवा मर्त्याँ आविवेश ।। इति ।**

मन्त्रोऽयम् ऋक्संहितायाम् आम्नातः । तत्राग्निदेवतायाः स्वरूपमहिमाप्रकर्षप्रकाशार्थं मन्त्रस्थपदानि व्यवहृतानि । परन्तु महाभाष्ये पतञ्जलिना मन्त्रोऽयं व्याकरणस्य स्वरूपबोधकत्वेन तथा प्रशंसाबोदकेन कथितः । मन्त्रेऽस्मिन् व्याकरणस्य स्वरूपभूतानि सर्वाणि अङ्गाणि रूपकच्छलेन उल्लिखितानि सन्ति । व्याकरणशास्त्रं तथा व्याकरणप्रतिपाद्यशब्दः अत्र वृषभरूपेण उल्लिखितः । वृषभोऽयं न साधारणः । अस्य चत्वारि शृङ्गाणि सन्ति । अत्र शृङ्गशब्देन नामाख्यातोपसर्गनिपाता इति चत्वारि पदानि प्रतिपादितानि । त्रिभिश्चरणैः भूतभविष्यद्वर्तमानरूपं कालत्रयं विवक्षितम् । द्वाभ्यां मस्तकाभ्यां शब्दस्य नित्यानित्यभेदेन द्विविधत्वं बोधितम् । त्रिधा बद्ध इत्यनेन शब्दः उरःकण्ठशिरोरूपस्थानत्रयेषु विशेषप्रयत्नेन अभिव्यक्तो भवतीति । रोरवीति इति क्रियापदेन शब्दब्रह्मम शब्दविवर्तप्रपञ्चप्रसारणं साधयति इति अवगम्यते । महो देव इत्यनेन शब्दब्रह्मणा सह अस्माकं साम्यं यथा स्यात्तदर्थं व्याकरणं पठनीम् इति शम् ।